काव्यालापाश्च ये केचित् गीतकान्यखिलानि च
सर्व्वमूर्त्तिधरस्यैते वपुर्विष्णोर्महात्मन: ॥
यान्यमूर्त्तानि मूर्त्तानि यान्यत्रान्यत्र वा क्वचित् ।
सन्ति वै वस्तुजातानि तानि सर्व्वाणि तद्वपु: ॥”
इति विष्णुपुराणे १ अंशे २२ अध्याय: ॥ * ॥
हरि सान्निध्यस्थानानि यथा,—

भरद्वाज उवाच ।

“केषु केषु विभो नित्यं स्थानेषु पुरुषोत्तम ! ।
सान्निध्यं भवतो ब्रूहि ज्ञातुमिच्छामि तत्त्वत: ॥

वामन उवाच ।

श्रूयतां कथयिष्यामि येषु येषु गुरो ह्यहम् ।
निवसामि सुपुण्येषु स्थानेषु बहुरूपवान् ॥
ममावतारैर्बहुधा नभ:स्थलं
पातालमम्भोनिचयं दिवञ्च ।
दिश: समस्ता गिरयोऽम्बुदाश्च
व्याप्ता भरद्वाज ममानुरूपै: ॥
ये दिव्या ये च भौमा जलगगनचरा स्थावरा येऽत्र विश्वे
सेन्द्रा: सार्का: सचन्द्रा यमवसुवरुणा: साग्नय: सर्व्वपाला: ।
ब्रह्माद्या: स्थावरान्ता द्विजखगसहिता मूर्त्तिमन्तो ह्यमूर्त्ता-
स्ते सर्व्वे मत्प्रसूता बहुविविधगुणा: पूरणार्थं पृथिव्या: ॥
एते हि मुख्या: सुरसिद्धदानवै:
पूज्यास्तथा सन्निहिता महीतले ।
यैर्दृष्टमात्रै: सहसैव नाशं
प्रयाति पापं द्विजवर्य्य कीर्त्तितै: ॥”
इति वामने ८५ अध्याय: ॥ * ॥
अपि च ।

श्रीभगवानुवाच ।

आद्यं मात्स्यं महद्रूपं संस्थितं मानसे ह्रदे ।
सर्व्वपापक्षयकरं कीर्त्तनस्पर्शनादिभि: ॥
कौर्म्ममन्यत् सन्निधानं कौशिक्यां पापनाशनम् ।
हयग्रीवञ्च कृष्णाङ्गे गोविन्दं हास्तिने पुरे ॥
त्रिविक्रमञ्च कालिन्द्यां लिङ्गभेदे भवं विभुम् ।
केदारे माधवं शौचं कुब्जाम्रे कृष्णमूर्द्धजम् ॥
नारायणं वदर्य्याञ्च वाराहे गरुड़ासनम् ।
जयेशं रुद्रकर्णे च विपाशायां द्विजप्रियम् ॥
कृतशौचे नृसिंहञ्च गोकर्णे विश्वकर्म्मिणम् ।
प्राचीने कामपालञ्च पुण्डरीकं महाम्भसि ॥
विशाखयूपे च ह्यजितं हंसं हंसपदे तथा ।
पयोष्ण्याञ्च तम: खण्डं वितस्तायां स्वरूविलम् ॥
मणिमत्पर्व्वते ब्रह्मन् ! ब्रह्माणञ्च प्रजापतिम् ।
मधुनद्यां चक्रधरं शूलबाहुं हिमाचले ॥
विद्धि विष्णुं मुनिश्रेष्ठ स्थितमौषधसद्मनि ।
भृगुतुङ्गे सुवर्णाख्यं नैमिषे पीतवाससम् ॥
गयायां गोपतिं देवं गदापाणिनमीश्वरम् ।
त्रैलोक्यनाथं वरदं गोप्रभावे कुशेशयम् ॥
अर्द्धनारीश्वरं पुण्ये महेन्द्रे दक्षिणे गिरौ ।
गोपालमुत्तरे नित्यं महेन्द्रे सोमपिण्डिनम् ॥
वैकुण्ठमपि सह्याद्रौ पारिपात्रे पराजितम् ।
कशेरुदेशे देवेशं विश्वरूपं तपोधन ! ॥
मलयाद्रौ च सौगन्धिं विन्ध्यपादे सदाशिवम् ।
अवन्तिविषये विष्णुं निषेधेष्वमरेश्वरम् ॥
पाञ्चालिकञ्च ब्रह्मर्षे पञ्चालेषु व्यवस्थितम् ।
महोदये हयग्रीवं प्रयागे योगशायिनम् ॥
स्वयम्भुवं मधुवने अयोगन्धिञ्च पुष्करे ।
तथैव विप्रगवर वाराणस्याञ्च केशवम् ॥
अविमुक्तकमत्रैव लोलश्चात्रैव गीयते ।
पद्मायां पद्मकिरणं समुद्रे वड़वामुखम् ॥
कुमारवने वाह्लीशं कार्त्तिकेयञ्च बर्हिणम् ।
यक्षेशं शम्भुमनघं स्थाणुञ्च कुरुजाङ्गले ॥
वनमालिनमाहुर्म्मां किष्किन्धावासिनो जना: ।
वीरं कुवलयारूढ़ं शङ्खचक्रगदाधरम् ॥
श्रीवत्साङ्कमुदाराङ्गं नर्म्मदायां श्रिय: पतिम् ।
माहिष्मत्यां त्रिनयनं तत्रैव च हुताशनम् ॥
अर्व्वुदेषु त्रिसौपर्णं क्ष्माधरं शूकराचले ।
त्रिणाचिकेतं ब्रह्मर्षे प्रभासेषु कपर्द्दिनम् ॥
तथैवात्रापि विख्यातं तृतीयं शशिशेखरम् ।
उदये शशिनं सूर्य्यं ध्रुवञ्च त्रितयं स्थितम् ॥
मन्दरे यज्ञपुरुषं स्कन्दं शरवणे स्थितम् ।
महालये स्मृतं रुद्रं चत्वरेषु कुरुष्वथ ॥
पद्मनाभं मुनिश्रेष्ठ सर्व्वसौख्यप्रदायकम् ।
सप्तगोदावरे ब्रह्मन् विख्यातं हाटकेश्वरम् ॥
तत्रैव च महावासं प्रयागेऽपि वटेश्वरम् ।
भद्रोवने महायोगं मद्रेषु पुरुषोत्तमम् ॥
प्लक्षावतरणे श्रीमत्श्रीनिवासं द्विजोत्तमम् ।
सूर्पारके चतुर्ब्बाहुं मगधायां सुधापतिम् ॥
गिरिव्रजे पशुपतिं श्रीकण्ठं यमुनातटे ।
वनस्पतिं समाख्यातं दण्डकारण्यवासिना ॥
कालञ्जरे नीलकण्ठं शरय्वां शम्भुमुत्तमम् ।
हंसयुक्तं महाकौश्यां सर्व्वपापप्रणाशनम् ॥
गोकर्णे दक्षिणे सर्व्वं वासुदेवं प्रजामुखे ।
विन्ध्यशृङ्गे महासौरिं कथायां मधुसूदनम् ॥
त्रिकूटशिखरे ब्रह्मं सक्रमाणिनमीश्वरम् ।
लौहदण्डे हृषीकेशं कौशलायां मनोहरम् ॥
महाबाहुं सुराष्ट्रे च नवराष्ट्रे यशोधरम् ।
भूधरं देविकानद्यां महोदायां कुशप्रियम् ॥
गोमत्यां छादितगदं शङ्खोद्धारे च शङ्खिनम् ।
सुनेत्रं सैन्धवारण्ये शूरं शूरपुरे स्थितम् ॥
भद्राक्षञ्च हिरण्वत्यां वीरभद्रं त्रिविष्टपे ।
शङ्कुकर्णञ्च भीमायां भीमं शालवने विदु: ।
विश्वामित्रञ्च गदितं कैलासे वृषभध्वजम् ।
महेशं महिलाशैले कामरूपे शशिप्रभम् ॥
वड़भ्यामपि गोमित्रं पटहे पङ्कजप्रियम् ।
उपेन्द्रं सिंहलद्वीपे शक्राख्ये कुन्दमालिनम् ॥
रसातले च विख्यातं सहस्रशिरसं मुने ! ।
कालाग्निरुद्रं तत्रैव तथान्यं कीर्त्तिवाससम् ॥
सुतले कूर्म्ममचलं वितले पङ्कजासनम् ।
महातले गुरो ख्यातं देवेशं छागलेश्वरम् ॥
तले सहस्रचरणं सहस्रभुजमीश्वरम् ।
सहस्राक्षं परिख्यातं मुषलाकृष्टदानवम् ॥
पाताले योगिनामीशं स्थितञ्च हरिशङ्करम् ।
धरातले कोकनदं मेदिन्याञ्चक्रपाणिनम् ॥
भुवर्लोके च गरुड़ं स्वर्लोके विष्णुमव्ययम् ।
मर्त्त्यलोके तथागस्त्यं कपिलञ्च जले स्थितम् ॥
तपोलोके स्थितं ब्रह्मन् ! वाङ्मयं सत्यसंयुतम् ।
ब्रह्माणं ब्रह्मलोके तु सप्तमे वै प्रतिष्ठितम् ॥
सनातनं तथा शैवे परं ब्रह्म च वैष्णवे ।
अप्रतर्क्यं निरालम्बे निराकाशे तपोमयम् ॥
जम्बुद्वीपे चतुर्ब्बाहुं कुशद्वीपे कुशेशयम् ।
प्लक्षद्वीपे मुनिश्रेष्ठ ख्यातं गरुड़वाहनम् ॥
पद्मनाभं तथा क्रौञ्चे शाल्मले वृषभध्वजम् ।
सहस्रांशु: स्थित: शाके धनराट् पुष्करे स्थित: ॥
तथा पृथिव्यां ब्रह्मर्षे ! शालग्रामे स्थितोऽस्म्यहम् ।
सजलस्थलपर्य्यन्तं चरेषु स्थावरेषु च ॥
एतानि पुण्यानि ममालयानि
ब्रह्मन् पुराणानि सनातनानि ।
धर्म्मप्रधानानि महौजसानि
संकीर्त्तनीयान्यघनाशनानि ॥
सङ्कीर्त्तनात् स्मरणाद्दर्शनाच्च
संस्पर्शनादेव च देवताद्या: ।
धर्म्मार्थकामान्यपवर्गमेव
लभन्ति दैत्या मनुजा: ससाध्या: ।
एतानि तुभ्यं विनिवेदितानि
ममालयानीह सुनिष्ठितानि ॥”
इति वामनपुराणे स्वस्थानोक्तिर्नाम ८६ अ: ॥
हरिहरयोरभेदो यथा,—
“या श्री: सा गिरिजा प्रोक्ता यो हरि: स त्रिलोचन: ।
एवं सर्व्वेषु शास्त्रेषु पुराणेषु च पठ्यते ॥
एतस्मादन्यथा यस्तु ब्रूते शास्त्रं पृथक् तया ।
तं नास्तिकं विजानीयात् सर्व्वधर्म्मबहिष्कृतम् ।
इति वाराहे सौभाग्यव्रतनामाध्याय: ॥ * ॥
ब्रह्मविष्णुमहेश्वराणामेकत्वं सत्त्वादिरूपत्त्वञ्च यथा,—

महेश्वर उवाच ।

“नारायण: परो देव: सत्त्वरूपो जनार्द्दन: ।
त्रिधात्मानं स भगवान् ससर्ज परमेश्वर: ॥
रजस्तमोभ्यां युक्तोऽभूद्रज:सत्त्वाधिकं विभु: ।
ससर्ज नाभिकमलात् ब्रह्माणं कमलासनम् ॥
रजसा तमसा युक्तं सोऽपि मां त्वसृजत् प्रभु: ।
यत् सत्त्वं स हरिर्द्देवो यो हरिस्तत् परं पदम् ॥
ये सत्त्वरजसी सोऽपि ब्रह्मा कमलसम्भव: ।
यो ब्रह्मा सैव देवस्तु यो देव: स चतुर्म्मुख: ॥
यद्रजस्तमसोपेतं सोऽयं नास्त्यत्र संशय: ।
सत्त्वं रजस्तमश्चैव तृतीयं चैतदुच्यते ॥
सत्त्वेन मुच्यते जन्तु: सत्त्वं नारायणात्मकम् ।
न तस्मात् परतो देवो भविता न भविष्यति ॥
यो विष्णु: स स्वयं ब्रह्मा यो ब्रह्मा सोऽहमेव च ।
वेदत्रयेऽपि यज्ञेऽस्मिन् पण्डितेष्वेष निश्चय: ॥
यो भेदं कुरुतेऽस्माकं त्रयाणां द्विजसत्तम ।